# ४७. कुडुंगेश्वरनाभेयदेवकल्पः ।

श्वेताम्बरेण चारणमुनिनाचार्येण **वज्रसेनेन** ।
**शकावतार**तीर्थे **श्रीनाभेयः** प्रतिष्ठितो जीयात् ॥ १ ॥
[6]**कुडुंगेश्वर**नाभेयदेवस्यानल्पतेजसः । कल्पं जल्पामि लेशेन दृष्ट्वा शासनपट्टिकाम् ॥ २ ॥

पूर्वं [7]**लाटदेश**मण्डन**भृगुकच्छ**पुरालङ्कारे **शकुनिकाविहारे** स्थिताः श्री**वृद्धवादि**सूरयो 'यो येन निर्जीयते तेन तस्य शिष्येण भाव्य'मिति प्रतिज्ञां विधाय वादकरणार्थं **दक्षिणापथा**यातं कर्णाट[8]भट्टदिवाकरं निर्जित्य व्रतं ग्राहयां चक्रिरे । **सिद्धसेनदिवाकरे**त्यभिधयाऽभ्यधुः । ततः कतिचिद्दिनैर्निःशेषानप्यागमानध्यजीगपत् । अन्यदा तु सकलानप्यागमान् संस्कृतानहं करोमीति तेन वचनमिदमूचे । ततः पूज्या अपीदमभिदधिरे–किं संस्कृतं कर्तुं न जानन्ति श्रीमन्तस्तीर्थङ्करा गणधरा वा यदर्द्धमागधेनागमानकृषत । तदेवं जल्पतस्तव महत्प्रायश्चित्तमापन्नम् । किमेतत्तवाग्रतः कथ्यते । स्वयमेव जानन्नसि । ततो विमृश्याभिदधे–भो भगवन् ! आश्रितमौनो द्वादशवार्षिकं पाराञ्चितं नाम प्रायश्चित्तं गुप्तमुखवस्त्रिकारजोहरणादिलिङ्गः प्रकटितावधूतरूपश्चरिष्यामीत्यावश्यकम् । उपयुक्त इति गुरुभिरभिहितमाकर्ण्य देशान्तरग्रामनगरादिषु पर्यटन् द्वादशे वर्षे श्रीम**दुज्जयिन्यां कुडुंगेश्वर**देवालये शेफालिकाकुसुमरंजिताम्बरालङ्कृतशरीरः समागत्यासांचक्रे । ततो देवं कस्मान्न नमस्यतीति लोकैर्जल्प्यमानोऽपि नाजल्पत् । एवं च[9] जनपरम्परया श्रुत्वा, सर्वत्रानृणीकृतविश्वविश्वंभराङ्कितनिजैकवत्सरः श्री**विक्रमादित्य**देवः समागत्य जल्पयांचकार–क्षीरलिलिक्षो भिक्षो[10] ! किमिति त्वया देवो न नमस्यते[11] ? । ततस्त्विदमवादि वादिना–मया नमस्कृते देवे लिङ्गभेदो भवतामप्रीतये भविष्यति । राज्ञोचे–भवति (°तु ? ) क्रियतां नमस्कारः । तेनोक्तम्–श्रूयतां तर्हि । ततः पद्मासनेन भूत्वा [12]द्वात्रिंशद्-द्वात्रिंशिकाभिर्देवं स्तोतुमुपचक्रमे । तथा हि—

1 C अट्ठं । 2 Pa °फुरिआण । 3 Pa °पवसण° । 4 C °प्पसवणी । 5 B बीआ य । 6 P कुडंगेश्वर° । 7 Pa ललाट° । 8 C °पट्ट° । 9 B नास्ति 'च' । 10 P नास्ति । 11 C देवो न मंस्यते; Pa न नमस्यंते । 12 P B नास्ति 'द्वात्रिंशद्' ।

1 C अट्ठं । 2 Pa °फुरिआण । 3 Pa °पवसण° । 4 C °प्पसवणी । 5 B बीआ य । 6 P कुडंगेश्वर° । 7 Pa ललाट° । 8 C °पट्ट° । 9 B नास्ति 'च' । 10 P नास्ति । 11 C देवो न मंस्यते; Pa न नमस्यंते । 12 P B नास्ति 'द्वात्रिंशद्' ।

स्वयंभुवं भूतसहस्रनेत्रमनेकमेकाक्षरभावलिङ्गम् । अव्यक्तमव्याहतविश्वलोकमनादिमध्यान्तमपुण्यपापम् ॥ १ ॥

इत्यादि प्रथम एव[1] श्लोके प्रासादस्थितात् शिखिशिखाग्रादिव लिङ्गाद्धूमवर्तिरुदस्थात् । ततो जनैर्वचनमिदमूचे–अष्टविद्येशाधीशः कालाग्निरुद्रोऽयं भगवांस्तृतीयनेत्रानलेन भिक्षुं भस्मसात्करिष्यति । ततस्तडित्तेज इव सतडत्कारं प्रथमं ज्योतिर्निर्गत्याप्रतिचक्राताड्यमानमिथ्यादृष्टिदैवतमामूलालिङ्गं द्विधा भित्त्वा प्रादुरास पद्मासनासीनः स्वयंभूर्भगवा**न्नाभिसूनुः** । तदनया दर्शनप्रभावनया तीर्णः पाराञ्चिताम्भोनिधिरिति विमुच्य रक्ताम्बराणि, प्रकटीकृत्य मुखवस्त्रिकारजोहरणादिलिङ्गानि, महाराजं धर्मलाभाक्षरैराशीर्वादयांचक्रे वादीन्द्रः । ततो विनयपुरस्सरम्–

सूरये **सिद्धसेना**य दूरादुच्छ्रितपाणये । धर्मलाभ इति प्रोक्ते ददौ कोटिं नराधिपः ॥ १ ॥

ततः प्रभून् क्षमयित्वा नृपतिः स्तुतिमकार्षीत् । यथा–

उद्व्यूढपाराञ्चित**सिद्धसेनदिवाकरा**चार्यकृतप्रतिष्ठः ।
श्रीमान् **कुडुंगेश्वरनाभिसूनु**र्देवः शिवायास्तु जिनेश्वरो वः ॥ १ ॥

ततो भगवतो भट्टश्रीदिवाकरसूरेर्देशनया [2]संजीविनीचारिचरकन्यायेन स्वाभाविकभद्रकतया विशेषतः सम्यक्त्वमूलां देशविरतिं प्रत्यपादि श्री**विक्रमादित्यः** । ततश्च **गोहृद**मण्डले च **सांबद्रा**[3] प्रभृतिग्रामाणामेकनवतिं, **चित्रकूट**मण्डले **वसाड**प्रभृतिग्रामाणां †चतुरशीतिं, तथा [4]**घुंटारसी**प्रभृतिग्रामाणां चतुर्विंशतिं, **मोहडवासक**मण्डले **ईसरोडा**प्रभृतिग्रामाणां† षट्पञ्चाशतं श्री**कुडुंगेश्वरऋषभदेवा**य शासनेन स्वनिःश्रेयसार्थमदात् । ततः शासनपट्टिकां 'श्रीम**दुज्जयिन्यां,** संवत् १, चैत्रसुदि १, गुरौ, [5]भाटदेशीयमहाक्षपटलिकपरमार्हतश्वेताम्बरोपासकब्राह्मण**गौतम**सुत**कात्यायने**न राजाऽलेखयत् ।' ततः श्री**कुडुंगेश्वर**ऋषभदेवप्रकटीभवनदिनात् प्रभृति सर्वात्मना मिथ्यात्वोच्छेदेन सर्वानपि जटाधरादीन् दर्शनिनः श्वेताम्बरान् कारयित्वा परिमुक्तमिथ्यादृष्टिदेवगुरुः सकलामप्यवनीं जैनमुद्राङ्कितां चकार । ततः परितुष्टैः श्री**सिद्धसेन**सूरिरभिदधे वसुधाधवः ।

पुण्णे वाससहस्से सयंमि अहिअंमि नवनवइकलिए । होही **कुमरनरिंदो** तुह **विक्कम**राय ! सारिच्छो ॥ १ ॥

इत्थं ख्यातिं सर्वजगत्पूज्यतां चोपगतः श्री**कुडुंगेश्वर**युगादिदेव इति ।

**कुडुंगेश्वर**देवस्य कल्पमेतं यथाश्रुतम् । रुचिरं रचयां चक्रुः श्री**जिनप्रभ**सूरयः ॥ १ ॥

**॥ इति कुडुंगेश्वरयुगादिदेवकल्पः ॥**

॥ ग्रं० ५५, अ० १८ ॥

---

1 C नास्ति 'एव' । 2 B P संजीवनी° । 3 B साबद्रा; P सावद्रा । † एतदन्तर्गता पंक्तिः नास्ति P आदर्शे । 4 C घंटारसी । 5 B C भाद° ।